# Avalokiteshvara Stava

# અવલોકિતેશ્વરસ્તવઃ

## Document Information

Text title : Avalokiteshvara Stava

File name : avalokiteshvarastavaH.itx

Category : deities_misc, buddha, stava

Location : doc_deities_misc

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# અવલોકિતેશ્વરસ્તવઃ

ૐ નમોऽવલોકિતેશ્વરાય ।

ભુવનત્રયવન્દિતલોકગુરુમમરાધિપતિસ્તુતબ્રહ્મવરમ્ ।
મુનિરાજવરં દ્યુતિસિદ્ધિકરં પ્રણમામ્યવલોકિતનામધરમ્ ॥ ૧॥

સુગતાત્મજરૂપસુરૂપધરં બહુલક્ષણભૂષિતદેહવરમ્ ।
અમિતાભતથાગતમૌલિધરં કનકાબ્જવિભૂષિતવામકરમ્ ॥ ૨॥

કુટિલામલપિઙ્ગલધૂમ્રજટં શશિબિમ્બસમુજ્જ્વલપૂર્ણમુખમ્ ।
કમલાયતલોચનચારુવરં હિમખણ્ડવિપાણ્ડુરગણ્ડયુગમ્ ॥ ૩॥

અધરં જિતપઙ્કજનાભિસમં શરદમ્બુદગર્જિતમેઘરુતમ્ ।
બહુરત્નવિભૂષિતબાહુયુગં તનુકોમલશાદ્વલપાણિતલમ્ ॥ ૪॥

મૃગચર્મવિવેષ્ટિતવામતનું શુભકુણ્ડલમણ્ડિતલોલધરમ્ ।
વિમલં કમલોદરનાભિતલં મણિમણ્ડિતમેખલહેમવરમ્ ॥ ૫॥

કટિવેષ્ટિતચિત્રસુવસ્ત્રધરં જિનબોધિમહોદધિપારગતમ્ ।
બહુપુણ્યમુપાર્જિતલબ્ધવરં જ્વરવ્યાધિહરં બહુસૌખ્યકરમ્ ॥ ૬॥

શુભશાન્તિકરં ત્રિભવાસ્યકરં સચરં ખચરં સ્તુતિદેહધરમ્ ।
વિવિધાકુલનિર્જિતમારબલં દશપારમિતાપરમાર્થકરમ્ ॥ ૭॥

ચતુરસ્રવિહારવિવેકપરં તથતાદ્વયબોધવિબોધકરમ્ ।
મણિનૂપુરગર્જિતપાદયુગં ગજમન્દવિલમ્બિતહંસગતિમ્ ॥ ૮॥

પરિપૂર્ણમહામૃતલબ્ધધૃતિં ક્ષીરોદજલાર્ણવનિત્યગતિમ્ ।
શ્રીપોતલકાભિનિવાસરતિં કરુણામયનિર્મલચારુદૃશમ્ ॥ ૯॥

ઇતિ શ્રીમદાર્યાવલોકિતેશ્વરભટ્ટારકસ્ય
ચન્દ્રકાન્તાભિક્ષુણીવિરચિતઃ સ્તવઃ સમાપ્તઃ ॥

*Avalokiteshvara Stava*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*